अथवा लेपनं शस्तं शशस्य रुधिरेण च ।
यद्वृन्तुदवत्वक् स्यादजामूत्रेण पेषिता ॥
जातीफलस्य लेपस्तु हरेद्व्यङ्गञ्च नीलिकाम् ।
अर्कक्षीरहरिद्राभ्यां मर्द्दयित्वा प्रलेपनात् ॥
मुखकार्ष्ण्यं शमं याति चिरकालोद्भवं ध्रुवम् ।
मसूरैः क्षीरसंपिष्टैर्लिप्तमास्यं घृतान्वितैः ॥
सप्तरात्रात् भवेत् सत्यं पुण्डरीकदलोपमम् ।
वटस्य पाण्डुपत्राणि मालती रक्तचन्दनम् ॥
कुष्ठं कालीयकं लोध्रमेभिर्लेपं प्रयोजयेत् ॥
युवानपिडकानाशु व्यङ्गानाञ्च विनाशनम् ।
स्यादेतेन मुखञ्चापि वर्जितं नीलिकादिभिः ॥
कालीयकं कलम्बक इति लोके । युवानपिडका
युवाननं तत्र पिडका पृषोदरादित्वान्नकारलोपः।
कुङ्कुमं चन्दनं लोध्रं पतङ्गं रक्तचन्दनम् ।
कालीयकमुशीरञ्च मञ्जिष्ठा मधुयष्टिका ॥
पत्रकं पद्मकं कुष्ठं पद्मं गोरोचना निशा ।
लाक्षा दारुहरिद्रा च गैरिकं नागकेशरम् ॥
पलाशकुसुमञ्चापि प्रियङ्गुश्च वटाङ्कुराः ।
मालती च मधूच्छिष्टं सर्षपाः सुरभिर्व्वचा ॥
चतुर्गुणपयःपिष्टैरेतैरक्षमितैः पृथक् ।
पचेन्मन्दाग्निना वैद्यस्तैलं प्रस्थद्वयोन्मितम् ॥
अस्याभ्यञ्जनादेतद्व्यङ्गं नीलिकया सह ।
तिलकं मषकं न्यच्छं नाशयेन्मुखदूषिकाम् ॥
पद्मिनीकण्टकं वापि हरेन्मतुमर्षिं तथा ।
विदध्याद्वदनं पूर्णचन्द्रमण्डलसुन्दरम् ॥
पतङ्गं बकम् इति लोके। कालीयकं कलम्ब इति
लोके। सुरभिर्व्वचा महाभरी इति लोके।
कुङ्कुमाद्यं तैलम् ।” इति भावप्रकाशः ॥

नीलिनी, स्त्री, ( नीलः प्रशस्ततयाऽस्त्यस्या इति। इनिः। ततो ङीप् ।) नीलीवृक्षः। इत्यमरः। २।४।९५॥ ( पर्य्यायोऽस्या यथा, वैद्यकरत्नमालायाम् ।
“नीलिनीच्छगलान्त्री स्यादन्तःकोटरपुष्प्यपि ।
अश्वाणी नीलवुह्ना स्यान्नीलपुष्पातिलोमशा ॥”
यथा च ।
“नीली तु नीलिनी तूली कालदोला च नीलिका।
रञ्जनी श्रीफली तुत्था ग्रामीणा मधुपर्णिका ॥
क्लीतका कालकेशी च नीलपुष्पा च सा स्मृता।
नीलिनी रेचनी तिक्ता केश्या मोहभ्रमापहा ॥
उष्णा हन्त्युदरप्लीहवातरक्तकफानिलान् ।
आमवातमुदावर्त्तं मदञ्च विषमुद्धृतम् ॥”
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥ )
श्यामत्रिपुटा। इति शब्दरत्नावली ॥
अजमीढस्य पत्नी। इति विष्णुपुराणे ४ अंशे १९ अध्यायः ॥ (तथा च हरिवंशे। ३२। ४५।
“अजमीढस्य पत्न्यस्तु तिस्रो रूपसमन्विताः।
नलिनी केशिनी चैव धूमनी च वराङ्गना ॥”)

नीली, स्त्री, ( नीलो निष्पाद्यत्वेनास्त्यस्याः इति। नील+अच् ततो ङीष्। ) वृक्षभेदः। नीलेर गाछ इति भाषा ॥ तत्पर्य्यायः। काला २ क्लीतकिका ३ ग्रामीणा ४ मधुपर्णिका ५ रञ्जनी ६ श्रीफली ७ तुत्था ८ तूणी ९ दोला १० नीलिनी ११। इत्यमरः। २। ४। ९४॥ नीला १२ तूली १३ श्रोणी १४ मेला १५। इति भरतः॥ नीलपत्री १६ राज्ञी १७ नीलिका १८ नीलपुष्पी १९ काली २० श्यामा २१ शोधनी २२ श्रीफला २३ ग्राम्या २४ भद्रा २५ भारवाही २६ मोचा २७ क्लमा २८ असङ्गकेशी २९ महाफला ३० असिता ३१ क्लीतनी ३२ केशी ३३ चारटिका ३४ गन्धपुष्पा ३५ श्यामलिका ३६ रङ्गपत्री ३७ महाबला ३८ स्थिररङ्गा ३९ रङ्गपुष्पी ४० तूणी ४१ तूलिका ४२ क्लीबिका ४३। इति शब्दरत्नावली ॥ अस्या गुणाः। कटुत्वम्। तिक्तत्वम्। उष्णत्वम्। केश्यत्वम्। कासकफमरुद्विषोदरव्याधिगुल्मजन्तुज्वरनाशित्वञ्च। इति राजनिर्घण्टः॥ नीलिकारोगः। इति मेदिनी। ले, २९ ॥

नीलीरागः, पुं, स्थिरप्रेमपुरुषः। तत्पर्य्यायः। स्थिरसौहृदः २। इति हेमचन्द्रः। ३। १४०॥ (नीलीसञ्जातो रागः।) नीलवर्णः। इति नीलशब्दस्य नानार्थे शब्दरत्नावली ॥ नायकनायिकयोः पूर्व्वरागविशेषः। यथा,—
“नीलीकुसुम्भमञ्जिष्ठाः पूर्व्वरागोऽपि च त्रिधा।”
तत्रश्चोदाहरणं।
“न चातिशोभते यन्नापैति प्रेम मनोगतम्।
नीलीरागः स विज्ञेयो यथा श्रीरामसीतयोः ॥”
इति साहित्यदर्पणम् ॥

नीलोत्पलं क्ली, ( नीलं नीलवर्णमुत्पलमिति। ) नीलवर्णोत्पलम्। नीलशाँपला इति भाषा। तत्पर्य्यायः। उत्पलकम् २ कुवलयम् ३ इन्दीवरम् ४ कन्दोत्थम् ५ सौगन्धिकम् ६ सुगन्धम् ७ कुड्मलकम् ८ असितोत्पलम् ९॥ (यथा, भागवते। ५। २४। १०।
“भयकुलेशकुमुदक्षुभितनीरनीरजकुमुदकुवलयकह्लारनीलोत्पललोहितशतपत्रादिवनेषु ॥”)
अस्य गुणाः। अतिस्वादुत्वम्। शीतत्वम्। सुरभित्वम्। सौख्यकारित्वम्। पाके अत्यन्ततिक्तत्वम्। रक्तपित्तहरत्वञ्च। इति राजनिर्घण्टः॥

नीलोत्पली, [ न् ] पुं, ( नीलोत्पलं नीलोत्पलवीजं मनोहरशिञ्जनाय धार्य्यत्वेनास्त्यस्य इति इनिः।) मञ्जुघोषः। इति त्रिकाण्डशेषः॥

नीवरः, पुं, (नयत्यात्मानं यत्र कुत्रचित् देशयात्रानिष्पादनायेति। नी+“छित्वरच्छत्वरेति।” उणां ३। १। इति ष्वरच् प्रत्ययेन निपातनात् गुणाभावात् साधुः।) भिक्षुः। इत्युणादिकोषः॥ वणिजकम्। वास्तव्यम्। इति मेदिनी। रे, १७५॥ परिव्राट्। पङ्कः। जले, क्ली। इति संक्षिप्तसारोणादिवृत्तिः॥

नीवाकः, पुं, ( निरन्तरं नियतं वा उच्यते इति। नि+वच्+घञ् कुत्वं उपसर्गस्य दीर्घत्वं च।) महार्घहेतोर्धान्यादिषु जनानामादरातिशयः। तुलाधरणाधिक्यम्। क्रमाक्रमादरः। मूल्याधिक्यहेतोर्निश्चयेन परिच्छेदनम्। इति भरतः॥ तत्पर्य्यायः। प्रयामः २। इत्यमरः। ३।२।२३॥

नीवारः, पुं, ( नि+वृ+घञ् उपसर्गस्य दीर्घत्वं च।) तृणधान्यभेदः। इत्यमरः। २। ९। २५॥ उड़ीधान इति वङ्गभाषा। तीनी इति हिन्दीभाषा। तत्पर्य्यायः। अरण्यधान्यम् २ मुनिधान्यम् ३ तृणोद्भवम् ४ अरण्यशालिः ५। (यथा, शाकुन्तले। १ अङ्के।
“नीवाराः शुककोटरार्भकमुखभ्रष्टास्तरूणा-
मधः ॥” )
अस्य गुणाः। मधुरत्वम्। स्निग्धत्वम्। पवित्रत्वम्। पथ्यत्वम्। लघुत्वञ्च। इति राजनिर्घण्टः॥ तन्नामगुणाः।
“प्रसाधिका तु नीवारस्तृणान्नमिति च स्मृतम्।
नीवारः शीतलो ग्राही पित्तघ्नः कफवातकृत्॥”
इति भावप्रकाशः॥

नीविः, } स्त्री, ( निव्ययति निवीयते वा। नि+
नीवी, } व्येञ् + “नौ व्यो यलोपः पूर्व्वस्य च दीर्घः।” उणां। ४। १३५। इति इञ् यलोपः निशब्दस्य दीर्घत्वञ्च। ततः कृदिकारादक्तिन इति वा ङीष्।) परिपणम्। वणिजां मूलधनम्। राजपुत्रादेर्बन्धकः। इति सुभूतिः॥ स्त्रीकटीवस्त्रबन्धः। कोँचड़ी इति भाषा। (यथा, महाभारते। २। ६२। १९।
“एकवस्त्रा त्वधोनीवी रोदमाना रजस्वला ।”)
स्त्रीत्वमुपलक्षणं पुंस्कटीवस्त्रबन्धेऽपि। इत्यमरटीकायां भरतः। तथा च। “नीवीं विस्रंस्य परिहितवस्त्रस्य वामाङ्गग्रन्थिं मोचयित्वा आचमनमाह बौधायनः।” इति यजुर्व्वेदिश्राद्धतत्त्वम्॥ मूत्रस्य पिण्डादिभाड़े नीटकबन्धनम्। इति मथुरेशः॥

नीवृत्, पुं, (नियतं वर्त्तते वसत्यत्र जनसमूह इति। नि+वृत्+अधिकरणे क्विप्। “नहिवृतिवृषिव्यधिरुचिसहितनिषु क्वौ।” ६।३।११६। इति पूर्व्वपदस्य दीर्घः।) जनपदः। इत्यमरः। २।१।८॥
“है अङ्गवङ्गकलिङ्गपञ्चालमगधकोशलादौ मण्डलेन ख्याते ग्रामसमूहे।” इति भरतः॥

नीध्रं, क्ली, ( नितरां ध्रियते इति। नि+धृ+बाहुलकात् कप्रत्ययेन साधुः।) छदिप्रान्तभागः। छाँचि इति भाषा। तत्पर्य्यायः। वलीकम् २ पटलप्रान्तम् ३। इत्यमरः॥ नीव्रम्। इति भरतः॥ नेमिः। चन्द्रः। रेवतीनक्षत्रम्। वनम्। इति मेदिनी। रे, ५३॥

नीशारः, पुं, ( निःशीर्य्यते नितरां वा शीर्य्यन्ते हिमवाय्वादयोऽनेन अस्मादनेन वा। शॄ+घञ्। उपसर्गस्य दीर्घत्वञ्च।) हिमानिलनिवारणप्रावरणम्। इत्यमरः। २। ६। ११८॥ हिमानिलप्रावरणं घनं महद्वस्त्रम्। इति रमानाथः॥ काण्डारः। इति नयनानन्दः॥ मशारि इति कश्चित्। काण्डपटः। कानात इति कश्चित्। इति भरतः॥ ( यथा,—
“गौरिवाकृतनीशारः प्रायेण शिशिरे कृशः ॥”
इति सिद्धान्तकौमुद्याम्। ३। ३। २१।
इत्यस्य वृत्तौ ॥)